# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| कक्षा –आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ४ | |
|---|---|---|
| विषयः – वास्तुशास्त्रम् | (C.C.- 4.1.3. Old & New ) | गुणाः – ७० |
| दिनाङ्कः – ११/१०/२०१९ | सन्दर्भग्रन्थः बृहद्वास्तुमाला | समयः –०८.०० तः ११.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य सान्वयं व्याख्यां कुरुत।** **(५)**

(१) नृग्रामदिग्वर्ग मिताङ्कयोगेसूर्याद्दशेशा नवभिर्विभक्तान्।
आचंकुराजीशवुकेशुपूर्वा दशा ग्रहाणां कथिता मुनीन्द्रैः ॥

(२) यत्र वृक्षाः प्रोहन्ति सस्यं हर्षात्प्रवर्धते।
सा भूमिर्जिविता वाच्या मृता चातोऽन्यथा भवेत् ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि विवर्णनं करोतु ।** **(१०)**

(१) भूमिलक्षणानि विवेचयत।

(२) नूतनगृहे निषिद्धकाष्ठानि।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य उपरि ससन्दर्भ व्याख्यां कुरुत।** **(५)**

(१) दिनमानदले सप्ताङ्गुलच्छायाग्रतो हियत्।
शंकुमूले नीयमानं सूत्रं स्यादुत्तरा दिशा ॥

(२) अश्विन्यादित्रयं मेषे सिंहे प्रोक्तं मघात्रयम्।
मूलादित्रितयं चापे शेषभेषु द्वयं द्वयम् ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **(१०)**

(१) दिक्साधनम्।

(२) गृहारम्भः विचारः।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य उपरि व्याख्यां कुरुत।** **(५)**

(१) वास्तोः शिरसि पृच्छे च याम्यकुक्षौ च पृष्ठतः।
आयुः कमखनेत्रेव वामकुक्षौ खनिः शुभा ॥

(२) गृहारम्भोदिते मासे धिष्ण्ये वारे विशेद् गृहम्।
विशेत्सौम्यायने हर्म्यं तृणागारे तु सर्वदा ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि सारांशं लिखतु।** **(१०)**

(१) द्वारनिर्णयविचारः।

(२) गृहप्रवेशविचारः।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य उपरि ससन्दर्भ व्याख्यां कुरुत।** **(५)**

(१) सिंहद्वारं पूर्वमानेन कार्यं त्रिद्वयेका वा मालिकास्तम्भशीर्षे।
स्यालां मध्ये तोडकौ रक्षणार्थं भूमेनाधिकौ वापि सार्द्धौ॥

(२) सोमवारयूते मूले चापलग्ने मतान् द्रुमान्।
स्थापयेज्जीवलम्ने च रेवत्यां गुरुवासरे॥

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि विवर्णनं करोतु।** **(१०)**

(१) अश्वगृहनिर्माणम्।

(२) वृक्षविचारः।

## संयुक्तान्वितिः

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु।** **(१०)**

(१) अवर्णस्य स्वामी कः ?

(२) स्वनामराशेः पञ्चमराशियुक्तग्रामे निवासः शुभं भवति न वा ?

(३) चन्द्रदशायां को लाभः ?

(४) केतुदशायां किं फलम् ?

(५) कस्य वर्णस्य सुगन्धयुक्ता भूमिः ?

(६) क्षत्रियभूम्याः किं फलम् भवति ?

(७) पूर्वप्लवा रक्तगंधा भूमिः कस्य वर्णस्य कृते शुभम् ?

(८) पूर्वाच्या भूम्याः किं फलम् ?

(९) आयताकाराभूमेः किं फलम् ?

(१०) चतुरस्त्रकोणस्तम्भस्यनाम किम् ?

(११) शुभगृहे चन्द्रः अस्ति तदा किं फलम् ?

(१२) कर्कवृश्चिकमीनराशिनाम आयः कः ?

(१३) चन्द्रः सूर्येण दृष्टं तदा किं फलम् ?

(१४) माघमासे गृहनिर्माणस्य किम् फलम् ?

(१५) वृषभराशिगतसूर्ये गृहनिर्माणस्य किं फलम् ?

--००--